# भवान्यष्टकम्

हरिहरदेव शर्मा

कुंजे कोकिलकेकिकोककलिते क्रीडाऽऽकुला कालिके
कण्ठे कापि कृपाङ्करा कविकुले काव्यैककल्लोलिनी।
कल्याणं कुरु कोविदे किल कलौ कुम्भीन्द्रकाञ्चीक्वणत्
केयूरा कुहकङ्ककोपकठिना कल्पान्तकौतूहला ॥१॥

दुर्गा दैत्यदुरन्तदर्पदमनी देदीप्यमाना द्युति
देवी दुर्गतिदारणोद्यमदयादैन्यादिदावा द्रुतम्।
दोर्दर्द ण्डद्वय दुष्टदम्भदलिनी दायादरा दीप्यते
दिव्या दानद देव देव दयिता दृग्दीर्घदंष्ट्रोद्भटा ॥२॥

प्राचीने प्रकृते पुराणपुरुषे प्राणप्रिये पार्वति
प्रीत्या पाहि पुनः पुनः परपदप्राप्तिप्रकर्षप्रदे।
पूज्ये पण्डितपालकप्रणयिनि प्रातः पतङ्गप्रभा-
प्रोत्साहप्रमदप्रतापपरितः पूर्णप्रभावे प्रभोः ॥३॥

नूनं नाम निदेशनम्रनयना नानानने नोन्नति-
र्नारी नृत्यनिनादनर्मनिलया नित्या नरीनर्तते।
निर्देश्या निगमैर्नितान्तनिपुणा न्याये नयेनान्विता
निष्ठानिर्भरनिर्जरे न नमितोन्नेये नृपैर्नायकैः ॥४॥

भव्ये भूरि भुजङ्गभूषितभुजे भालाभिरामे भृशं
भूभर्त्री भवभामिनी भवजभूर्भ्रू भङ्गभाषाभरा ।
भूषाभिर्भु वने भयङ्करभटा भासाभिभूतभ्रमा
भाव्या भावुकभाग्यदा भगवती भूत्यै भवानी भव ।।५।।

रुद्राणी रमणे रता रतिरुता राजीवरागारुणा
रम्या रात्रि रमा रतीशरसिकारब्धारवा रंहसा ।
रामा रासरती रसज्ञरसना रामा रदै राजिता
रक्षोरक्षकराजराजरुचिरा रम्या रराजोरगैः ।।६।।

मातङ्गी मधुरा मुमोद मदिरा मत्ता महामानिनी
मुख्या मञ्जुलमन्दिरे मणिमये माणिक्यमालामला ।
मर्मज्ञा मधुमोहिनी मुकुरमा मेध्यामराणां मुहु-
र्मध्ये मध्यमनोहरा मुनिमनो माया महीमण्डले ।।७।।

तारे तामरसोत्तमे त्रिभुवने त्रायस्व तापत्रयात्
योग्या या यतियूथयोगयतिदा युद्धे यशोयन्त्रिता ।
शर्वाणी शशिशेखरा श्रुतिशुभश्रौतश्रिता शाम्भवी
घण्टाघर्घरघोषघोरघनभा घर्माश्वघौधा घृणा ।।८।।

हरिहरकविराजनिर्मितं यः पठति नरो वरमष्टकं जितात्मा ।
इहधरदुहिता हिताय तस्य प्रभवति शङ्करशंकरा शिवा सा ।।६।।